# senajidgItA from Bharatamanjari of Kshemendra

# સેનજિદ્ગીતા ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતા

## Document Information

Text title : senajidgItA from Bharatamanjari of Kshemendra

File name : senajidgItABM.itx

Category : giitaa, kShemendra

Location : doc_giitaa

Author : Kshemendra

Description/comments : kAvyamAlA 65. Bharatamanjari

Latest update : October 15, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 15, 2022

*sanskritdocuments.org*

# સેનજિદ્ગીતા ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતા

કથં સમાશ્રયેદ્ધર્મં વિનષ્ટધનબાન્ધવઃ ॥ ૧૩.૬૯૭॥

સ તેન પૃષ્ટઃ પ્રોવાચ શૃણુ સેનજિતં નૃપમ્ ।
પુત્રશોકાકુલં કશ્ચિજ્જ્ઞાત્વાભ્યેત્યાવદદ્દ્વિજઃ ॥ ૧૩.૬૯૮॥

અભાવાયૈવ જાયન્તે ભવેઽસ્મિન્સર્વજન્તવઃ ।
શોચ્યસ્ત્વમપિ કાલેન કથં શોચસિ પાર્થિવ ॥ ૧૩.૬૯૯॥

યદૃચ્છયા સઙ્ગતશ્ચેત્પ્રતિયાતો યદૃચ્છયા ।
સંસારાધ્વનિ તત્કોઽયં વિયોગે મોહવિભ્રમઃ ॥ ૧૩.૭૦૦॥

જાયતે ક્ષણદૃષ્ટેષુ સ્નેહો દુઃખાય દેહિનામ્ ।
મમાયમિતિ મુગ્ધાનાં ન સ તેષાં ન તસ્ય તે ॥ ૧૩.૭૦૧॥

શોચન્ત્યલુબ્ધં વાઞ્છન્તઃ પ્રાપ્તં શોચન્તિ દુર્ભગમ્ ।
નષ્ટં શોચન્તિ દુઃખાર્તા જન્તવઃ સુખિનઃ કદા ॥ ૧૩.૭૦૨॥

ધનપુત્રકલત્રેષુ ન સ્નિહ્યન્તિ વિપશ્ચિતઃ ।
અવશ્યં વિપ્રયોગો હિ તૈઃ પરૈશ્ચ નૃણાં સદા ॥ ૧૩.૭૦૩॥

કો નામ પ્રિયસંયોગાન્ન મન્યેતામૃતોપમાન્ ।
મર્મચ્છિદો વિયોગેષુ યદિ ન સ્યુર્વિષોત્કટાઃ ॥ ૧૩.૭૦૪॥

પિઙ્ગલા દત્તસઙ્કેતં કાન્તં વારાઙ્ગના પુરા ।
અનાગતં ચિરં ધ્યાત્વા સ્વયમેકાબ્રવીન્નિશિ ॥ ૧૩.૭૦૫॥

આગતેનાપિ કિં તેન વિયોગે દુઃખદાયિના ।
ભજે કાન્તમિહાન્તસ્થામનશ્વરમશોચકમ્ ॥ ૧૩.૭૦૬॥

ઇતિ સન્તોષપીયૂષશાન્તા શાપાપવેદના ।
પ્રતિબુદ્ધ્વૈવ સુષ્વાપ પરમે ધામ્નિ પિઙ્ગલા ॥ ૧૩.૭૦૭॥

ઇતિ ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતા સેનજિદ્ગીતા સમાપ્તા ।

*senajidgItA from Bharatamanjari of Kshemendra*

pdf was typeset on October 15, 2022

Please send corrections to *sanskrit@cheerful.com*